# Ajagara Gita

# અજગરગીતા

## Document Information

Text title : ajagaragItA

File name : ajagaragItA.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : PSA Easwaran

Description-comments : adhyAya 179/177

Source : Mahabharata, Shantiparva, Mokshadharmaparva, prahlAdaajagara saMvAda

Latest update : December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

*sanskritdocuments.org*

Ajagara Gita

# અજગરગીતા

મહાભારતે શાન્તિપર્વાન્તર્ગતા

ભીષ્મેણ યુધિષ્ઠિરમ્પ્રતિ પ્રપઞ્ચસ્યાનિત્યત્વાદિજ્ઞાનપૂર્વકવિરક્તેઃ
સુખહેતુતાયાં પ્રમાણતયા પ્રહ્લાદાજગરમુનિસંવાદાનુવાદઃ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ ।
કેન વૃત્તેન વૃત્તજ્ઞ વીતશોકશ્ચરેન્મહીમ્ ।
કિઞ્ચ કુર્વન્નરો લોકે પ્રાપ્નોતિ ગતિમુત્તમામ્ ॥ ૧॥

ભીષ્મ ઉવાચ ।
અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
પ્રહ્લાદસ્ય ચ સંવાદં મુનેરાજગરસ્ય ચ ॥ ૨॥

ચરન્તં બ્રાહ્મણં કઞ્ચિત્કલ્યચિત્તમનામયમ્ ।
પપ્રચ્છ રાજા પ્રહ્લાદો બુદ્ધિમાન્પ્રાજ્ઞસત્તમઃ ॥ ૩॥

પ્રહ્લાદ ઉવાચ ।
સ્વસ્થઃ શક્તો મૃદુર્દાન્તો નિર્વિધિત્સોઽનસૂયકઃ ।
સુવાગ્બહુમતો લોકે પ્રાજ્ઞશ્ચરસિ બાલવત્ ॥ ૪॥

નૈવ પ્રાર્થયસે લાભં નાલાભેષ્વનુશોચસિ ।
નિત્યતૃપ્ત ઇવ બ્રહ્મન્ન કિઞ્ચિદિવ મન્યસે ॥ ૫॥

સ્રોતસા હ્રિયમાણાસુ પ્રજાસુ વિમના ઇવ ।
ધર્મકામાર્થકાર્યેષુ કૂટસ્થ ઇવ લક્ષ્યસે ॥ ૬॥

નાનુતિષ્ઠસિ ધર્માર્થૌ ન કામે ચાપિ વર્તસે ।
ઇન્દ્રિયાર્થાનનાદૃત્ય મુક્તશ્ચરસિ સાક્ષિવત્ ॥ ૭॥

કા નુ પ્રજ્ઞા શ્રુતં વા કિં વૃત્તિર્વા કા નુ તે મુને ।
ક્ષિપ્રમાચક્ષ્વ મે બ્રહ્મઞ્શ્રેયો યદિહ મન્યસે ॥ ૮॥

ભીષ્મ ઉવાચ ।
અનુયુક્તઃ સ મેધાવી લોકધર્મવિધાનવિત્ ।
ઉવાચ શ્લક્ષ્ણયા વાચા પ્રહ્લાદમનપાર્થયા ॥ ૯॥

પશ્ય પ્રહ્લાદ ભૂતાનામુત્પત્તિમનિમિત્તતઃ ।
હ્રાસં વૃદ્ધિં વિનાશં ચ ન પ્રહૃષ્યે ન ચ વ્યથે ॥ ૧૦॥

સ્વભાવાદેવ સન્દૃશ્યા વર્તમાનાઃ પ્રવૃત્તયઃ ।
સ્વભાવનિરતાઃ સર્વાઃ પ્રતિપાદ્યા ન કેનચિત્ ॥ ૧૧॥

પશ્ય પ્રહ્લાદ સંયોગાન્વિપ્રયોગપરાયણાન્ ।
સઞ્ચયાંશ્ચ વિનાશાન્તાન્ન ક્વચિદ્વિદધે મનઃ ॥ ૧૨॥

અન્તવન્તિ ચ ભૂતાનિ ગુણયુક્તાનિ પશ્યતઃ ।
ઉત્પત્તિનિધનજ્ઞસ્ય કિં પર્યાયેણોપલક્ષયે। ૧૩॥

જલજાનામપિ હ્યન્તં પર્યાયેણોપલક્ષયે ।
મહતામપિ કાયાનાં સૂક્ષ્માણાં ચ મહોદધૌ ॥ ૧૪॥

જઙ્ગમસ્થાવરાણાં ચ ભૂતાનામસુરાધિપ ।
પાર્થિવાનામપિ વ્યક્તં મૃત્યું પશ્યામિ સર્વશઃ ॥ ૧૫॥

અન્તરિક્ષચરાણાં ચ દાનવોત્તમ પક્ષિણામ્ ।
ઉત્તિષ્ઠતે યથાકાલં મૃત્યુર્બલવતામપિ ॥ ૧૬॥

દિવિ સઞ્ચરમાણાનિ હ્રસ્વાનિ ચ મહાન્તિ ચ ।
જ્યોતીંષ્યપિ યથાકાલં પતમાનાનિ લક્ષયે ॥ ૧૭॥

ઇતિ ભૂતાનિ સમ્પશ્યન્નનુષક્તાનિ મૃત્યુના ।
સર્વં સામાન્યતો વિદ્વાન્કૃતકૃત્યઃ સુખં સ્વપે ॥ ૧૮॥

સુમહાન્તમપિ ગ્રાસં ગ્રસે લબ્ધં યદૃચ્છયા ।
શયે પુનરભુઞ્જાનો દિવસાનિ બહૂન્યપિ ॥ ૧૯॥

આસ્રવત્યપિ મામન્નં પુનર્બહુગુણં બહુ ।
પુનરલ્પં પુનસ્તોકં પુનર્નૈવોપપદ્યતે ॥ ૨૦॥

કણં કદાચિત્ખાદામિ પિણ્યાકમપિ ચ ગ્રસે ।
ભક્ષયે શાલિમાંસાનિ ભક્ષાંશ્ચોચ્ચાવચાન્પુનઃ ॥ ૨૧॥

શયે કદાચિત્પર્યઙ્કે ભૂમાવપિ પુનઃ શયે ।

પ્રાસાદે ચાપિ મે શય્યા કદાચિદુપપદ્યતે ॥ ૨૨॥

ધારયામિ ચ ચીરાણિ શાણક્ષૌમાજિનાનિ ચ ।
મહાર્હાણિ ચ વાસાંસિ ધારયામ્યહમેકદા ॥ ૨૩॥

ન સન્નિપતિતં ધર્મ્યમુપભોગં યદૃચ્છયા ।
પ્રત્યાચક્ષે ન ચાપ્યેનમનુરુધ્યે સુદુર્લભમ્ ॥ ૨૪॥

અચલમનિધનં શિવં વિશોકં
શુચિમતુલં વિદુષાં મતે પ્રવિષ્ટમ્ ।
અનભિમતમસેવિતં વિમૂઢૈ-
ર્વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૨૫॥

અચલિતમતિરચ્યુતઃ સ્વધર્મા-
ત્પરિમિતસંસરણઃ પરાવરજ્ઞઃ ।
વિગતભયકષાયલોભમોહો
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૨૬॥

અનિયતફલભક્ષ્યભોજ્યપેયં
વિધિપરિણામવિભક્તદેશકાલમ્ ।
હૃદયસુખમસેવિતં કદર્યૈ-
ર્વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૨૭॥

ઇદમિદમિતિ તૃષ્ણયાઽભિભૂતં
જનમનવાપ્તધનં વિષીદમાનમ્ ।
નિપુણમનુનિશામ્ય તત્ત્વબુદ્ધ્યા
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૨૮॥

બહુવિધમનુદૃશ્ય ચાર્થહેતોઃ
કૃપણમિહાર્યમનાર્યમાશ્રયં તમ્ ।
ઉપશમરુચિરાત્મવાન્પ્રશાન્તો
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૨૯॥

સુખમસુખમલાભમર્થલાભં
રતિમરતિં મરણં ચ જીવિતં ચ ।
વિધિનિયતમવેક્ષ્ય તત્ત્વતોઽહં
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૩૦॥

અપગતભયરાગમોહદર્પો
ધૃતિમતિબુદ્ધિસમન્વિતઃ પ્રશાન્તઃ ।
ઉપગતફલભોગિનો નિશામ્ય
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૩૧॥

અનિયતશયનાસનઃ પ્રકૃત્યા
દમનિયમવ્રતસત્યશૌચયુક્તઃ ।
અપગતફલસઞ્ચયઃ પ્રહૃષ્ટો
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૩૨॥

અપગતમસુખાર્થમીહનાર્થૈ-
રુપગતબુદ્ધિરવેક્ષ્ય ચાત્મસંસ્થમ્ ।
તૃષિતમનિયતં મનો નિયન્તું
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૩૩॥

ન હૃદયમનુરુધ્યતે મનો વા
પ્રિયસુખદુર્લભતામનિત્યતાં ચ ।
તદુભયમુપલક્ષયન્નિવાહં
વ્રતમિદમાજગરં શુચિશ્ચરામિ ॥ ૩૪॥

બહુ કથિતમિદં હિ બુદ્ધિમદ્ભિઃ
કવિભિરપિ પ્રથયદ્ભિરાત્મકીર્તિમ્ ।
ઇદમિદમિતિ તત્ર તત્ર હન્ત
સ્વપરમતૈર્ગહનં પ્રતર્કયદ્ભિઃ ॥ ૩૫॥

તદિદમનુનિશામ્ય વિપ્રપાતં
પૃથગભિપન્નમિહાબુધૈર્મનુષ્યૈઃ ।
અનવસિતમનન્તદોષપારં
નૃષુ વિહરામિ વિનીતદોષતૃષ્ણઃ ॥ ૩૬॥

ભીષ્મ ઉવાચ ।
અજગરચરિતં વ્રતં મહાત્મા
ય ઇહ નરોઽનુચરેદ્વિનીતરાગઃ ।
અપગતભયલોભમોહમન્યુઃ
સ ખલુ સુખી વિચરેદિમં વિહારમ્ ॥ ૩૭॥

ઇતિ શ્રીમન્મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ

સપ્તસપ્તત્યધિકશતતમોऽધ્યાયઃ ॥ ૧૭૭ ॥

Mahabharata - Shanti Parva - Chapter Footnotes ટિપ્પણી

૨ આજગરસ્યાऽજગરવૃત્ત્યા જીવતઃ ॥

૪ નિર્વિધિત્સો નિરારમ્ભઃ ॥

૬ સ્રોતસા કામાદિવેગેન । કૂટસ્થો નિર્વ્યાપારઃ ॥

૭ ઇન્દ્રિયાર્થાન્ ગન્ધરસાદીનનાદૃત્ય ચરસિ
તન્નિર્વાહમાત્રાર્થી અશ્નાસિ ॥

૮ પ્રજ્ઞા તત્ત્વદર્શનમ્ । શ્રુતં તન્મૂલભૂતં
શાસ્ત્રમ્। વૃત્તિસ્તદર્થાનુષ્ઠાનમ્। શ્રેયો મમેતિ શેષઃ ॥

૯ અનુયુક્તઃ પૃષ્ટઃ । લોકસ્ય ધર્મો જન્મજરાદિસ્તસ્ય વિધાનં
કારણં તદભિજ્ઞઃ લોકધર્મવિધાનવિત્ ॥

૧૦ અનિમિત્તતઃ કારણહીનાદ્બ્રહ્મણઃ । પશ્ય આલોચય ॥

૧૨ તસ્માદહં મનો ન ક્વચિદ્વિષયે વિદધે ધારયામિ તદ્વિનાશે
શોકોત્પત્તિં જાનન્ ॥

૧૫ પાર્થિવાનાં પૃથિવીસ્થાનામ્ ॥

૧૯ આજગરીં વૃત્તિં પ્રપઞ્ચયતિ સુમહાન્તમિત્યાદિના ॥

૨૦ આશયન્તિ ભોજયન્તિ ॥

૨૬ કષાયઃ રાગદ્વેષાદિઃ ॥

૨૮ ધનપ્રાપ્તૌ કર્મૈવ કારણં ન પૌરુષમિતિ ધિયા
નિશામ્યાલોચ્ય ॥

૨૯ અર્થહેતોરનાર્યં નીચમ્ । આર્યં સ્વામિનમાશ્રયતિ યઃ
કૃપણો દીનજનસ્તમનુદૃશ્યોપશમરુચિઃ। આત્મવાન્ જિતચિત્તઃ ॥

૩૦ વિધિનિયતં દૈવાધીનમ્ ॥

૩૧ મતિરાલોચનમ્ । બુદ્ધિર્નિશ્ચયઃ। ઉપગતં સમીપાગતં
ફલં પ્રિયં યેષાં તાન્ ભોગિનઃ સર્પાન્ અજગરાન્ નિશામ્ય
દૃષ્ટ્વા। ફલભોગિન ઇતિ મધ્યમપદલોપઃ ॥

૩૨ પ્રકૃત્યા દમાદિયુક્તઃ
અપગતફલસઞ્ચયસ્ત્યક્તયોગફલસમૂહઃ ॥

૩૩ એષણાવિષયૈઃ પુત્રવિત્તાદિભિર્હેતુભિઃ । અસુખાર્થં
પરિણામે દુઃખાર્થમ્। અપગતમાત્મનઃ પરાઙ્મુખં તૃષિતમનિયતં
ચ મનોઽવેક્ષ્ય। ઉપગતબુદ્ધિર્લવ્ધાલોકઃ। આત્મસંસ્થમાત્મનિ સંસ્થા
સમાપ્તિર્યસ્ય તત્તથા તું વ્રતં ચરામિ ॥

shAntiparva (12), adhyAya 177 (adhyAya number defers in the scanned file.)

Proofread by PSA Easwaran

---

*Ajagara Gita*

pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*